उपशास्त्री - द्वितीय खण्ड साहित्य तृतीयः पत्रम्

## किरातार्जुनीय महाकाव्यम्
### प्रथमः सर्गः

प्र० (1) – न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि ॥

उत्तरम् – प्रसङ्गः – प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति – यदा शत्रवः निरन्तरमपकारायणा एव भवन्ति तदा प्रचुरप्रतापशालिनो भवतः समयपरिपालनम् नोचितम् । यतो हि विजयाभिलाषिणो राजानः शत्रु-विषये सन्धि विघटनं केनापि छद्मना कुर्वन्ति ।

व्याख्या :- परेषु = शत्रुषु । निकृतिः परं = प्रधानं येषु तेषु तथोक्तेषु अपकारतत्परेषु सत्सु । [भूरि धाम यस्यासौ भूरिधामा, तस्य] भूरिधाम्नः = महौजसः प्रतीकारक्षमस्य । ते = तव । समयः = त्रयोदशसंवत्सरान्वने वत्स्यामी' त्येवंरूपा संवित् । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । तस्य परिरक्षणं [= परिपालनं] न क्षमं = न युक्तम् । 'युक्ते क्षमं शक्ते हिते त्रिषु' इत्यमरः । हि = यस्मात् । [विजयमर्थयन्ते तच्छीलाः] विजयार्थिनः = विजिगीषवः । [क्षितेः ईशाः] क्षितीशाः । अरिषु = विषये [उपधिना सहितं] सोपधि = सकपटं यथा तथा । 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः । [सन्धेः दूषणानि] सन्धिदूषणानि - विदधति = केनचिद् व्याजेन दोषमापाद्य सन्धिं दूषयन्ति । विघटयन्तीत्यर्थः । शक्तस्य हि विजिगीषोः सर्वथा कार्यसाधनं प्रधानमन्यत् समयरक्षणादिकमशक्तस्येति भावः । अर्थान्तरन्यासोऽलङ्कारः पुष्पिताग्रा वृत्तम् ।

Renu Devi
01/11/20
राधा उमाकान्त सं० महाविद्यालय सुखसेना,
पूर्णिया ।

शास्त्री - II खण्ड साहित्य
रत्नावली - नाटिका
प्रथमोऽङ्कः

प्र० (1) – अस्मिन्प्रकीर्णपटवासकृतान्धकारे
दृष्टो मनाङ् मणिविभूषणरश्मिजालैः ।
पातालमुद्यतफणाकृतिशृङ्गकोऽयं
मामद्य संस्मरयतीह भुजङ्गलोकः ।।

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि श्रीहर्षदेव वर्येन प्रणीतस्य रत्नावली नाट्यशास्त्रस्य प्रथमोऽङ्कात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके राजा विदूषकम्प्रति कथयति -

व्याख्या - अस्मिन् = एतस्मिन् । प्रकीर्णपटवासकृतान्धकारे - प्रकीर्णः = क्षिप्तः यः पटवासः = पिष्टातकः, तेन कृतः = सम्पादितः यः अन्धकारः तमः, तस्मिन् । मणिविभूषणरश्मिजालैः - मणीनाम् विभूषणानि तेषां रश्मिजालैः (पक्षे - मणयः एव विभूषणानि, तेषां रश्मिजालैः) = रत्नालङ्कारकिरणसमूहैः । मनाक् = ईषत् । दृष्टः = विलोकितः । उद्यतफणाकृतिशृङ्गकः = उद्यतानि फणाकृतीनि शृङ्गकाणि येन तथा = उत्क्षिप्तफणाकारधारायन्त्रः । अयम् = एषः । भुजङ्गलोकः = विटसमूहः (पक्षे - सर्पसमूहः) (भुजङ्गोऽहौ च पिङ्गे च' इति मेदिनी) । अद्य = अधुना इह = अत्र । माम् = वत्सराजम् । पातालम् = अधोलोकम् । संस्मरयति स्मृतिपथं नयति । अत्र रसिकजनं दृष्ट्वा पातालस्मरणेन स्मरणालङ्कारः, भुजङ्गपदे च सर्पविटविश्लिष्टत्वेन श्लेषालङ्कारः । वसंततिलका वृत्तम् । उक्ता वसन्ततिलका तभजाजगौगः' इति ।

Renu devi
01/10/20
राधा उमाकान्त सं० महावि० सुरसेना (पूर्णिया)

शास्त्री - I खण्ड साहित्य

अभिज्ञानशाकुन्तलम्

पञ्चमोऽङ्कः

प्र० (1) पद्यमिदम् व्याख्येयम् ।

प्रजाः प्रजाःस्वा इव तन्त्रयित्वा निषेवतेऽशान्तमना विविक्तम् ।
यूथानि संचार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः ॥

सन्दर्भ-प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञान-शाकुन्तलम् नाट्यशास्त्रस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके महर्षेः कण्वस्य शिष्यादीनामागमनं निवेदयितमुपस्थितः कञ्चुकी धर्मासनादुत्थाय रहसि विश्रामं कुर्वतो राज्ञो दुष्यन्तस्य तात्कालिकीमवस्थां वर्णयति —

व्याख्याः — एषदेवः = अयमस्माकं महाराजो दुष्यन्तः स्वाः = स्वकीयाः प्रजाः = अपत्यानि इव प्रजाः = स्वीयप्रजाजनान् तन्त्रयित्वा = संव्यवहार्य, स्वं-स्वं कार्यं कारयित्वा यद्वा विवादशमनादिभिः संरक्ष्य अत एवाशान्तमनाः शान्तं = अनुद्विग्नं मनः = चित्तं यस्य स शान्तमना न शान्तमना नशान्तमना अशान्तमनाः — धर्मेण प्रजापालनरूपकर्तव्यसम्पादनात् अव्यग्रचित्तः द्विपेन्द्रः गजयूथाधिपः दिवा = दिवसे, मध्याह्ने यूथानि = गजसमूहान् संचार्य = चारयित्वा, आहारविहारादिषु व्यापार्य अत एव रविप्रतप्तः = सूर्यकिरणसन्तापातिपीड़ितः शीतं = प्रच्छाय-शीतलं स्थानमिव विविक्तं = विजनं स्थानमिव निषेवते = भजते, विश्राम-योग्ये विजने स्वैरमुपविशतीत्यर्थः ।

अत्रोपमानुप्रासयोः संसृष्टिरलङ्कारः वृत्तञ्चोपेन्द्रवज्रा ।

Renu Devi
01/11/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।